## तृतीयाध्यायस्य तृतीयः पादः

### उणादयो बहुलम् । (१/३१६९)

[1]वर्तमान इत्येव, सञ्ज्ञायाम् इति च । उणादयः प्रत्ययाः वर्तमाने[2]ऽर्थे सञ्ज्ञायां विषये बहुलं भवन्ति । यतो विहितास्ततोऽन्यत्रापि भवन्ति । [3]केचिदविहिता [4]एव प्रयोगत उन्नीयन्ते । 'कृवापाजिमिस्वदिसाध्यशूभ्य उण्' (उ. सू. १) । कारुः । वायुः । पायुः । जायुः । मायुः । स्वादुः । साधुः । आशुः ।

बाहुलकं प्रकृतेस्तनुदृष्टेः प्रायसमुच्चयनादपि तेषाम् ।
कार्यसशेषविधेश्च तदुक्तं नैगमरूढिभवं हि सुसाधु ॥१॥

नाम च धातुजमाह निरुक्ते व्याकरणे [5]शकटस्य च तोकम् ।
यन्न पदार्थविशेषसमुत्थं प्रत्ययतः प्रकृतेश्च तदूह्यम् ॥२॥

सञ्ज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे ।
कार्याद् विद्यादनुबन्धमेतच्छास्त्रमुणादिषु ॥३॥ (म. भा. २.१३८)

### भूतेऽपि दृश्यन्ते । (२/३१७०)

पूर्वत्र वर्तमानाधिकाराद् [6]भूतार्थमिदं [7]वचनम् । भूते[8] काले उणादयः प्रत्यया दृश्यन्ते । वृत्तमिदं[9] वर्त्म । चरितं तदिति चर्म । भसितं तद् इति भस्म । दृशिग्रहणं [10]प्रयोगानुसारार्थम्[11] ॥

### भविष्यति गम्यादयः । (३/३१७१)

भविष्यति काले गम्यादयः शब्दाः साधवो भवन्ति । प्रत्ययस्यैव भविष्यत्कालता विधीयते न प्रकृतेः । [12]गमी ग्रामम् । [13]आगामी । प्रस्थायी । प्रतिरोधी । [14]प्रतिबोधी । प्रतियोधी । प्रतियोगी । प्रतियायी । [15]आयावी । भावी ।

[२९४] अनद्यतन उपसङ्ख्यानम् । (म. भा. २.१३९)
श्वो गमी ग्रामम् (म. भा. २.१३९) ॥

### यावत्पुरानिपातयोर्लट् । (४/२७८३)

भविष्यतीत्येव । [16]यावत्पुराशब्दयोर्निपातयोरुपपदयोः भविष्यति काले [17]धातोर्लट् प्रत्ययो भवति । यावद् भुङ्क्ते । पुरा भुङ्क्ते । निपातयोः इति किम् ? यावद् दास्यति तावद् भोक्ष्यते । करणभूतया पुरा व्रजिष्यति ॥

---

1. वर्तमाने नास्ति अ. 2. धात्वर्थे अ. ब. क. ड. फ. ह. 3. क्वचित् अ. ब. 4. अपि फ. 5. शठस्य ब. 6. भूतार्थं नास्ति ब. फ. 7. उक्तम् अ. क. 8. च इत्यधिकम् फ, अपि इत्यधिकम् अ. ब. ड. ह. 9. तत् ब. क. 10. प्रयोगानुसरणार्थम् ब. ह. 11. वृतिचरिभसिभ्यो अमुः इत्यधिकम् क. 12. ग्रामगमी ग. 13. आगमी अ. 14. प्रतिबोधी नास्ति ब, प्रतिबोधी – भावी नास्ति ह. 15. आयायी अ, नास्ति ग. 16. यावत् पुरा इत्येतयोः अ. ब. क. 17. धातोः नास्ति ग.